पदन्यासः १। श्रीविद्याविषये वश्विन्यादि १ नवयोन्यात्मक २ पीठ ३ तत्त्व ४ पञ्चदशी ५ षोड़शी ६ संहार ७ स्थिति ८ सृष्टि ९ वाद १० षोढ़ा ११ गणेश १२ ग्रह १३ नक्षत्र १४ योगिनी १५ राशि १६ त्रिपुरा १७ षोड़शनित्या १८ कामरति १९ सृष्टिस्थिति २० प्रकटयोगिनी २१ आयुध २२ न्यासाः। ताराविषये रुद्र १ ग्रह २ लोकपाल ३ न्यासाः। एतेषां प्रमाणानि तन्त्रसारादौ द्रष्टव्यानि॥

न्युङ्खः, पुं, ( न्युङ्ख्यते इति। नि+उङ्ख गतौ+घञ्। ) सामवेदे नियतप्रणवषट्कम्। दीर्घवानयमिति नयनानन्दः। इत्यमरभरतौ॥ सम्यक्। मनोज्ञः। इति मेदिनी। खे, २॥

न्युब्जं, क्ली, ( न्युब्जति अधोमुखीभवतीति। नि+उब्ज+अच्। ) कर्म्मरङ्गफलम्। इति मेदिनी। जे,१२॥ श्राद्धादिपात्रभेदः। इति शब्दरत्नावली॥ तथा च गोभिलः। प्रथमे पात्रे संस्रवान् समवनीय पात्रं न्युब्जं कुर्य्यात् पितृभ्यः स्थानमसीति। प्रथमे पात्रे पितृपात्रे। संस्रवान् पितामहादिपात्रार्घपात्रस्थशेषजलानि। समवनीय क्रमेण स्थापयित्वा तत्पात्रस्य प्रपितामहपात्रेणाच्छादनमाह शौनकः। प्रपितामहपात्रेण पिधाय प्रतिष्ठापयतीति। याज्ञवल्क्योनापि तत्पात्रस्याधःस्थत्वाभिधानात् पात्रान्तरेण पिधानमाक्षिप्तम्। तथा च याज्ञवल्क्यः।

"दत्त्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः।
पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः॥"

विधानतः यथापूर्व्वं स्थापितं क्रमेण। तेन प्रपितामहपात्रेणाधःकृतं पितृपात्रं ऊर्द्ध्वमुखमवस्थितं न्युब्जं करोति। तन्न्यासश्च। पितृपात्रे निधायाथ न्युब्जमुत्तरतो न्यसेत्। इति मत्स्यपुराणवचने न्यसेदित्यत्राख्यातोपस्थापितकर्त्तुर्व्वामपार्श्वे कर्त्तव्यः। इति श्राद्धतत्त्वम्॥

न्युब्जः, पुं, ( नि+उब्ज+अच्। ) दर्भमयस्रुक्। इति मेदिनी। जे, ११॥ ( यथा,—

"शयनासनयानानामुत्तानानान्तु दर्शनम्।
न्युब्जानामितरेषाञ्च पात्रादीनामशोभनम्॥"

इति वाभटे शारीरस्थाने। ६। २३॥ )

कुशः। स्रुक्। इति हेमचन्द्रः॥

न्युब्जः, त्रि, ( न्युब्जति अधोमुखीभवतीति। नि+उब्ज+अच्। ) कुब्जः। अधोमुखः। इति मेदिनी। जे, १२॥ ( यथा, हरिवंशे। ६१। ६।

"स तत्रैकेन पादेन शकटं पर्य्यवर्त्तयत्।
न्युब्जं पयोधराकाङ्क्षी चकार च रुरोद च॥")

रुजा सुग्नः। इत्यमरः। २। ६। ६१॥ रोगेण वक्रीकृतपृष्ठाधोमुखपुरुषादिः। इति भरतः॥

न्युब्जखड्गः, पुं, ( न्युब्जः खड्गः। ) कुब्जखड्गः। वाँका तरवार इति भाषा॥ तत्पर्य्यायः। कटीतलः २। इति त्रिकाण्डशेषः॥

न्यूनं, त्रि, ( न्यूनयति। नि+ऊन परिहाणे+अच्। ) गर्ह्यम्। ( यथा, महाभारते। १३। १४३। ४६।

"एतैः कर्म्मफलैर्द्देवि! न्यूनजातिकुलोद्भवः।
शूद्रोऽप्यागमसम्पन्नो द्विजो भवति संस्कृतः॥")

ऊनम्। इत्यमरः। ३। ३। १२७॥ ( यथा, मनुः। ८। २०३।

"नान्यदन्येन संसृष्टरूपं विक्रयमर्हति।
न चासारं न च न्यूनं न दूरे न तिरोहितम्॥")

न्यूनपञ्चाशद्भावः, पुं, ( न्यूनपञ्चाशतः ऊनपञ्चाशद्वायूनां भावो यत्र। ) ऊनपञ्चाशद्भावः। पागल इत्यर्थः। यथा,—

"उदीरितेन्द्रियो धाता वीक्षाञ्चक्रे यदात्मजाम्।
तदैव न्यूनपञ्चाशद्भावा जाताः शरीरतः॥"

इति कालिकापुराणे द्वितीयाध्यायः॥

नृस्थिमाली, [ न् ] पुं, ( नृणामस्थिमाला नृस्थिमाला सा अस्यस्येति। इनिः। ) शिवः। इति त्रिकाण्डशेषः॥ नरास्थिमालाविशिष्टे, त्रि॥